# अथ तारतम्यस्तोत्रम्

विष्णुः सर्वोत्तमोऽथ प्रकृतिरथ विधिप्राणनाथावथोक्ते
ब्रह्माणी भारती च द्विजफणिपमृडाश्च स्त्रियः षट् च विष्णोः ।
सौपर्णी वारुणी पर्वतपतितनया चेन्द्रकामावथास्मान्
प्राणोऽथो योऽनिरुद्धो रतिमनुगुरवो दक्षशच्यौ च पान्तु ॥१॥

त्रायन्तां नः सदैते प्रवह उत यमो मानवी चन्द्रसूर्यौ
चाप्पोऽथो नारदोऽथो भृगुरनलकुलेन्द्रः प्रसूतिश्च नित्यम् ।
विश्वामित्रो मरीचिप्रमुखविधिसुताः सप्त वैवस्वताख्य-
श्चैवं वै मित्रतारे वरनिर्ऋतिनामा प्रावही च प्रसन्नाः ॥२॥

विष्वक्सेनोऽश्विनौ तौ गणपतिधनपावुक्तशेषाः शतस्थाः
देवाश्चोक्तेतरे ये तदवरमनवश्च्यावनोचथ्यसञ्ज्ञौ ।
वैन्यो यः कार्तवीर्यः क्षितिपतिशशबिन्दुः प्रियादिव्रतोऽथो
गङ्गापर्जन्यसञ्ज्ञे शशियमदयिते मा विराट् चाशु पान्तु ॥३॥

एभ्योऽन्ये चाग्निजाया च जलमयबुधश्चापि नामात्मिकोषा
चैवं भूमौ ततात्मा शनिरपि कथितः पुष्करः कर्मपोऽपि ।
येऽथाथो चाप्युतानामिह कथितसुरा मध्यभागे समास्ते
विष्ण्वाद्या नः पुनन्तु क्रमगदितमहातारतम्येन युक्ताः ॥४॥

वन्दे विष्णुं नमामि श्रियमथ च भुवं ब्रह्मवायू च वन्दे
गायत्रीं भारतीं तामपि गरुडमनन्तं भजे रुद्रदेवम् ।
देवीर्वन्दे सुपर्णीमहिपतिदयितां वारुणीमप्युमां ता-
मिन्द्रादीन् काममुख्यानपि सकलसुरांस्तद्गुरून्मद्गुरूंश्च ॥५॥

सर्वोत्तमो विष्णुरथो रमा च ब्रह्मा च वायुश्च तदीयपत्न्यौ ।
अन्ये च देवाः सततं प्रसन्ना हरौ सुभक्तिं मयि सन्दिशन्तु ॥

॥ इति कल्याणीदेवीविरचितं तारतम्यस्तोत्रम् ॥